Gyanshauryam, International Scientific Refereed Research Journal
© 2023 GISRRJ | Volume 6 | Issue 2 | ISSN : 2582-0095

# प्रथम प्रकारकातिशयोक्तयलङ्कारे गौणसाध्यवसानालक्षणायाः प्रयोजकहेतुता

डॉ. सीता राम शर्मा
प्रोफेसर (साहित्य) राजकीय धुलेश्वर आचार्य, (पी.जी. संस्कृत महाविद्यालय, मनोहरपुर, जयपुर)

**Article Info**
Volume 6, Issue 2
Page Number : 71-75
**Publication Issue :**
March-April-2023
**Article History**
Accepted : 01 April 2023
Published : 10 April 2023

**शोधसारांशः-** शक्तिः त्रिधा अभिधा, लक्षणा, व्यञ्जना चेति । अस्मिन् लेखे लक्षणां तद्भेदांश्च विविच्य, लक्षणभेदानां ध्वन्यलङ्कारयोः प्रयोजक- हेतुतायाः सिद्धिश्चेति विषयाः निरूपिताः । मम्मटः शुद्धायाः साध्यवसानाया उदाहरणम् 'आयुरेवेदम्' इति प्रस्तौति। उदाहरणेऽस्मिन् 'इदं' पदेन पुरोवर्तित्वरूपेण घृतादेरुपस्थितिर्न तु घृतत्वादिरूपेण, यतोहि घृतत्वरूपेण अर्थोपस्थितौ 'घृत 'पदस्य प्रयोग आवश्यकः, किन्तु 'घृत 'पदस्य प्रयोगोऽत्र नास्ति, अतः पुरोवर्तित्वरूपेणैव घृतस्योपस्थितिः । अत्र 'आयु: 'पदेन विषयिणा 'घृत 'मिति विषयो निगीर्णः ।

**मुख्यशब्दाः-** शक्तिः, अभिधा, लक्षणा, व्यञ्जना, मुख्यार्थः, बाधः, अर्थः।

**कथिता लक्षणाया ये भेदाश्श्रीमम्मटेन ते ।**
**ध्वन्यलङ्कारबीजत्वं यथा यान्ति तथोच्यते ' ॥**

अस्माकं साहित्यशास्त्रे शब्दस्य तिस्रश्शक्तयस्स्वीकृता वर्तन्ते अभिधा लक्षणा व्यञ्जना च। प्रत्येकं शक्तिः कस्यचिद् अर्थविशेषस्य प्रतिपादिका, तत्र का शक्ति: किंविधम् अर्थं प्रतिपादयतीति विषये साहित्यदर्पणकारो विश्वनाथो वक्ति-

**वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः ।**
**व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः ॥**

**एतासु शक्तिषु-** शक्तिग्रहं व्याकरणोपमानात् कोशाप्तवाक्याद् व्यवहारतश्च । वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥ इति नयेन साक्षात् सङ्केतितस्य अर्थस्य बोधिका शक्तिर्नाम अभिधा, मुख्यार्थबाधादिहेतु-त्रयसापेक्षोपस्थितिकस्य लक्ष्यार्थस्य बोधिका शक्तिर्नाम लक्षणा, मुख्यार्थबाधादिहेतुनिरपेक्षस्य वाच्यार्थबोधात् परं व्यजमानस्य अर्थस्य बोधिका शक्तिर्नाम व्यञ्जना च । प्रस्तूयमानेन शोधपत्रेण लक्षणां तद्भेदांश्च विविच्य लक्षणाभेदानां ध्वन्यलङ्कारयोः प्रयोजकहेतुतायाः सिद्धिश्चेति विषया निरूपयिष्यन्ते । स्वप्रतिपिपादयिषितविषयावबोधाय पूर्वं लक्षणैव निरूपणीयेति धिया लक्षणोत्थान- विषये वाग्देवतावतारस्य मम्मटस्य अभिमतं विव्रीयते-

**मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।**
**अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया' ॥**

अर्थाद् मुख्यार्थबाधे मुख्यार्थेन सामीप्यादिसम्बन्धयोगे रूढिवशात् प्रयोजनवशाद् वा यया शब्दशक्तया अन्यो मुख्यार्थभिन्नोऽर्थो लक्ष्यते सा शक्तिर्लक्षणा ।

लक्षणाभेदाः यथा- मम्मट : सर्वप्रथमं लक्षणाया उपादानलक्षणालक्षणलक्षणाख्यं द्विभेदं करोति,

**स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम् ।**
**उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ॥**

अर्थाद् यत्र मुख्यार्थः स्वस्य अर्थस्य सिद्धये परस्य अर्थस्य आक्षेपं करोति तत्र उपादानलक्षणा, यत्र च मुख्यार्थः परस्य अर्थस्य सिद्धये स्वस्य मुख्यार्थस्यैव समर्पणं त्यागं वा करोति तत्र लक्षणलक्षणा । लक्षणाया इमौ उपादानलक्षणालक्षणलक्षणाख्यौ भेदौ केवलं शुद्धाया लक्षणाया एव भवतः यतोहि एतयोर्भेदयोर्लक्षणा सादृश्येतर- कार्यकारणसम्बन्धादेव प्रवर्तत इति विशेषः । आद्यस्य भेदस्योदाहरणं मम्मटः 'कुन्ताः प्रविशन्ति' इति

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

प्रस्तौति । अत्र 'कुन्ताः' अचेतनाः अतस्तेषु प्रवेशक्रिया न सम्भवति, येन मुख्यार्थ - बाधः, जाते च मुख्यार्थबाधे लक्षणोत्थापकद्वितीयहेतुना स्वसंयोगसम्बन्धेन 'कुन्ताः' इति पदं स्वस्य अर्थस्य सिद्धये परस्य अर्थस्य 'कुन्तधारिणः पुरुषाः' इत्याकारस्य कुन्तगत-तीक्ष्णतारूपप्रयोजनप्रतिपादनाय उपादानं ग्रहणं वा करोति तस्मादुपादानलक्षणा । मम्मटभट्टानुसारं लक्षणाया द्वितीयस्य 'लक्षणलक्षणा' इत्याख्यस्य भेदस्योदाहरणं 'गङ्गायां घोषः' इत्यस्ति । अत्र 'गङ्गा' पदस्य मुख्यार्थो जलप्रवाहो, यस्मिन् घोषस्य अधिकरणत्वं बाधितमेव घोषस्य स्थितिर्जलप्रवाहे भवितुं नार्हति तस्माल्लक्षणाया द्वितीयहेतोः सामीप्यसम्बन्धात् तटरूपस्य अर्थस्य उपस्थितिर्जायते येन वाक्याकारो 'गङ्गायास्तटे घोषः' इति सम्पद्यते, किन्तु वक्त्रा साक्षाद् 'गङ्गायास्तटे घोषः ' इत्याकारके वाक्ये प्रयोक्तव्ये 'गङ्गायां घोषः' इति वाक्यं कथं प्रयुक्तम् ? इति चेत्, अत्र लक्षणायाः तृतीयेन केनापि हेतुना भाव्यमेव । अत्र 'गङ्गा' पदस्य अर्थः 'तटम्' भवतीति विषये क्वचिदपि न रूढिः प्रसिद्धिर्वा अर्थाद् गङ्गा पदस्य अर्थः तटं

**लक्षणाभेदानां ध्वन्यलङ्कारयोः प्रयोजकहेतुतासिद्धिः -** भवतु इत्यस्मिन् कापि रूढिर्नास्ति, अतः प्रयोजनरूपेण हेतुना अवश्यमेवात्र भाव्यम् । वक्तुः प्रयोजनमस्ति तादृशे 'गङ्गायां घोषः' इति वाक्यप्रयोगे लक्षणया उपस्थिते 'तटे' 'शैत्यपावनत्वरूपधर्म' - प्रतीतिः । अत्र गङ्गापदं परस्य तटरूपस्य अर्थस्य सिद्धये स्वस्य जलप्रवाहात्मकस्य अर्थस्य समर्पणं त्यागं वा करोति तस्माल्लक्षणलक्षणा ।

एतयोरुपर्युक्तयोर्भेदयोः प्रतिपादनानन्तरं मम्मटो लक्षणां गौणी सारोपा गौणी साध्यवसानेति रूपेण तथा च शुद्धा सारोपा शुद्धा साध्यवसानेति रूपेण चतुर्विधां विभजते, तत्र गौणीं सारोपां निरूपयन्नाह -

**सारोपान्या त यत्रोक्तौ विषयी विषयस्तथा' ।**

अर्थाद् यत्र विषयी उपमानं विषय उपमेयं चोभावपि साक्षाच्छब्दत उपात्तौ भवतः तत्र गौणी सारोपा लक्षणा । उदाहरणं 'गौर्वाहीक : ', अत्र गोगता जाड्यमान्द्यादिगुणा वाहीके आरोप्यन्ते, तस्माद् गुणेभ्य आगतत्वाद् गौणी सारोपा लक्षणा ।

**विषय्यन्तः कृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका ।**

यत्र विषयिणा उपमानेन विषय उपमेयं निगीर्यते कवलीक्रियते वा, तत्र साध्यवसाना लक्षणा। मम्मटो 'गौरयम्' इति उदाहरणं प्रस्तौति, उदाहरणेऽस्मिन् विषयिणा 'गौः' इति उपमानेन 'वाहीक 'रूपो विषयो निगीर्णः, तस्मात् साध्यवसाना लक्षणा।

लक्षणाया इमौ एव सारोपासाध्यवसानानामकौ प्रकारौ शुद्धाया लक्षणाया अपि भवतः किन्तु एतयोर्लक्षणाप्रकारयोः सादृश्येतरकार्यकारणादिसम्बन्धो भवति, सादृश्य- सम्बन्धेन गौणी सारोपा गौणी साध्यवसाना च लक्षणाप्रकारौ सम्पद्येते, सादृश्येतरसम्बन्धेन शुद्धा लक्षणा भवति । तत्र शुद्धायाः सारोपाया लक्षणाया उदाहरणम् 'आयुर्धृतम्' इत्यस्ति । अत्र 'आयुः ' विषयि 'घृतं' च विषयः । द्वावपि विषयिविषयौ साक्षाच्छब्दत उपात्तौ, 'आयुर्धृतम्' इति कथनात् 'आयुः 'पदस्यार्थो दीर्घकालजीवनम् घृतपदस्यार्थश्च कश्चिद् द्रव्यविशेषः, द्वयोर्नामार्थयोः अभेदः इति नियमः, किन्तु लोकेऽत्यन्तं भिन्नदशां प्राप्तयोर्द्वयोर्नामार्थयोः अभेदोऽयं कथं सङ्गच्छेत् ?, अर्थाद् आयुरेव घृतं कथं भवितुमर्हति? इति कारणान्मुख्यार्थबाधः तदनु लक्षणया द्वयोः कार्यकारणभाव- सम्बन्धेनाऽथवा जन्यजनकभावसम्बन्धेन 'आयुः' पदेन 'आयुष्कारणं' लक्ष्यते । अत्र केचन 'आयुः' पदेन 'आयुष्कारणं घृतं' लक्ष्यते इति मन्वते तन्त्र यतोहि 'घृतम्' इति पदं तु साक्षादुक्तमेवास्ति अतो वाक्ये उक्तं घृतपदं स्वम् अर्थं तु उपस्थापयत्येव, अत 'आयुः 'पदेन 'आयुष्कारण 'मेव लक्ष्यते, यथा 'मुखं चन्द्रः' इत्यस्य 'चन्द्रसदृशमात्रे' लक्षणा न तु 'चन्द्रसदृशे मुखे' इत्याकारकाधिकेऽर्थे, मुखस्य स्वपदेन उक्तत्वात् क्रियते, तेन चन्द्रसदृशे अर्थे विहिते सति चन्द्राभिन्नं मुख मिति शाब्दबोधः सम्पद्यते तथैवात्रापि आयुष्कारणमेव लक्ष्यार्थः तेन च 'आयुरभिन्नं घृत 'मिति बोधः सम्पद्यत इति ज्ञेयम्। व्यङ्ग्यरूपं प्रयोजनं चात्र 'घृते सहकारिव्युदासेन स्वतन्त्ररूपेण आयुर्जनकता' वर्तते, अथवा 'घृतम् आयुर्जनने स्वातिरिक्तं सहायानन्तरं विनाऽपि आयुर्जनने समर्थम्' इत्यस्ति । अत्र 'आयुर्धृतम्' इति स्थाने 'घृतमायुः' इति पदं प्रयोक्तुं शक्यमासीत्, किन्तु अत्र घृतरूपात् कारणाच्छीघ्रतया आयूरूपकार्योत्पत्तिं दर्शयितुं कार्यस्य पूर्वप्रयोगः कारणस्य च पश्चादित्यवधेयम्।

अग्रे च मम्मटः शुद्धायाः साध्यवसानाया उदाहरणम् 'आयुरेवेदम्' इति प्रस्तौति। उदाहरणेऽस्मिन् 'इदं' पदेन पुरोवर्तित्वरूपेण घृतादेरुपस्थितिर्न तु घृतत्वादिरूपेण, यतोहि घृतत्वरूपेण अर्थोपस्थितौ 'घृत 'पदस्य प्रयोग आवश्यकः, किन्तु 'घृत 'पदस्य प्रयोगोऽत्र नास्ति, अतः पुरोवर्तित्वरूपेणैव घृतस्योपस्थितिः । अत्र 'आयुः 'पदेन विषयिणा 'घृत 'मिति विषयो निगीर्णः । शुद्धसारोपालक्षणावद् 'आयुः' पदेन आयुष्कारणं 'इदम्' इति पदेन लभ्ये

घृते लक्ष्यते। व्यङ्ग्यरूपं प्रयोजनं चात्र 'घृतस्य आयुर्जनने स्वातिरिक्तं सहायानन्तरं विनाऽपि आयुर्जनने सामर्थ्यम्' इत्यस्ति। इत्थं मम्मटभट्टानुसारं लक्षणायाः षट् भेदाः सम्पद्यन्ते-

| | |
|---|---|
| 01 उपादानलक्षणा | कुन्ताः प्रविशन्ति |
| 02 लक्षणलक्षणा | गङ्गायां घोषः |
| 03 गौणी सारोपा | गौर्वाहीक: |
| 04 गौणी साध्यवसाना | गौरयम् |
| 05 शुद्धा सारोपा | आयुर्धृतम् |
| 06 शुद्धा साध्यवसाना | आयुरेवेदम् |

अग्रे अस्या लक्षणाया भेदानामुपयोगो ध्वन्यलङ्कारोत्थानेऽपि भवति अर्थाद् इमा षट्प्रकारिका लक्षणाः स्वोपस्थित्या ध्वनिविशेषस्योत्थाने अलङ्कारविशेषस्योत्थाने च हेतवो भवन्तीत्ययं रुचिरो विषय इदानीं प्रतिपाद्यते । लक्षणाया उपादानलक्षणा- लक्षणलक्षणाख्यौ भेदौ अविवक्षितवाच्यध्वनेः अर्थाल्लक्षणामूलध्वनेः प्रतिपादितयोर्द्वयोः भेदयोरर्थान्तरसङ्क्रमितवाच्यध्वनिरित्यस्य अत्यन्ततिरस्कृतवाच्यध्वनिरित्यस्य च हेतू भवतः ।

**लक्षणाभेदानां ध्वन्यलङ्कारयोः प्रयोजकहेतुतासिद्धिः**

**अर्थान्तरसङ्क्रमितवाच्यध्वनौ उपादानलक्षणायाः प्रयोजकहेतुता**

उपादानलक्षणायां वाक्यघटितं पदं स्वस्य अर्थस्य सिद्धये अपरम् अर्थम् उपादत्ते इति नियमः अनेनैव पूर्वं प्रतिपादितेन नियमेन अर्थान्तरसङ्क्रमितवाच्यध्वनेरपि सत्ता स्थिरा भवति, यथा-

**त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति ।**
**आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत् ' ॥**

अत्र सम्मुखस्थं संबोध्यं प्रति उक्तिः, यः सम्मुखस्थो भवति तस्य कृते 'त्वाम्' इति पदस्य प्रयोगो नोपयुज्यते, सम्मुखस्थाय संबोध्याय 'त्वां' पदस्य प्रयोगे अनुपयुक्ततारूपमुख्यार्थबाधः, तदनु लक्षणाया द्वितीयहेतुना 'त्वाम्' इति पदं सामान्यविशेषसम्बन्धबलाद् उपदेश्यं ( लक्ष्यार्थ) लक्षयति । 'वच्मि' इति पदं ( वच्मि तथा उपदिशामि इत्यनयोः क्रिययोः) अर्थदृष्ट्या किञ्चिन्मात्रं सारूप्यसम्बन्धाद् 'उपदिशामि' इति अर्थान्तरं लक्षयति । प्रयोजनं चात्र उपदेश्यस्य तस्य हितसाधनत्वमस्ति। अत्र 'त्वां' 'वच्मि' इति पदं स्वस्य अर्थस्य सिद्धये 'उपदेश्यम्' 'उपदिशामि' इत्यर्थान्तरे सङ्क्रमेते।

**अत्यन्ततिरस्कृतवाच्यध्वनौ लक्षणलक्षणायाः प्रयोजकहेतुता -** लक्षणलक्षणा नामको भेदो ध्वनेः अत्यन्ततिरस्कृतवाच्यध्वनिरिति भेदस्य उत्थाने प्रयोजकं बीजं वा भवति, इयं स्थितिर्मम्मटोपन्यस्तोदाहरणेन अवगन्तुं शक्यते, यथा-

**उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम् ।**
**विदधदीदृशमेव सदा सखे! सुखितमास्स्व ततः शरदां शतम् ॥**

प्रस्तुते पद्ये स्वशत्रुं प्रति कस्यचिदुक्तिः । किन्तु शत्रुं प्रति तादृशं कथनं न सङ्गच्छते इति मुख्यार्थबाधः, वैपरीत्यसम्बन्धेन 'उपकृतं' 'सुजनता' 'सुखितम्' 'शरदां शतम्' 'आस्स्व' इत्यादीनि पदानि स्वमर्थं समर्प्य तिरस्कृत्य वा क्रमशः 'अपकृतं' 'दुर्जनता' 'दुःखितम्' 'शीघ्रं' 'म्रियस्व' इति रूपम् अर्थं प्रकटयन्तीति अत्यन्ततिरस्कृतवाच्यध्वनिः । अस्मिन् अत्यन्ततिरस्कृतवाच्यध्वनौ बीजरूपेण लक्षणलक्षणैव वर्तते, यतोहि यथा 'गङ्गायां घोष:' इत्युदाहरणे गङ्गापदं घोषस्य अधिकरणत्वसिद्धये स्वार्थस्य जलप्रवाहात्मकस्य समर्पणं विधाय तटरूपमर्थं लक्षयति तथैव शत्रुं प्रति वक्तुरुक्तिसिद्धये 'उपकृतम्' इत्यादीनि पदानि स्वार्थं समर्प्य 'अपकृतम्' इत्यादीन् अर्थान् लक्षयन्ति।

रूपकालङ्कारे गौण्याः सारोपाया लक्षणायाः प्रयोजकहेतुता

गौण्यां लक्षणायाम् उपमानोपमेययोः अभेदारोपः क्रियते, अयमेव अभेदात्मको नियमो रूपकालङ्कारेऽपि उपयुज्यते यथा - 'तद्रूपकमभेदो य उपमानोपमेययोः " एतल्लक्षणानुसारमुदाहरणं द्रष्टुं शक्यते-

**ज्योत्स्नाभस्मच्छुरणधवला बिभ्रती तारकास्थी-**
**न्यन्तर्धानव्यसनरसिका रात्रिकापालिकीयम्।**
**द्वीपाद् द्वीपं भ्रमति दधती चन्द्रमुद्राकपाले**
**न्यस्तं सिद्धाञ्जनपरिमलं लाञ्छनस्य च्छलेन॥**

अत्र 'रात्र्यां' 'कापालिकी' आरोपिता वर्तते, 'ज्योत्स्नायां' 'भस्म' आरोपितं, 'तारकासु अस्थीनि' आरोपितानि, 'चन्द्रे' 'मुद्राकपालं' चारोपितं वर्तते, अतो रूपकं सम्पद्यते, अत्र रात्रिकापालिकी इत्यस्य कापालिक्यभिन्ना रात्रिः, ज्योत्स्नाभस्म इत्यस्य भस्माभिन्ना ज्योत्स्ना, तारकास्थीनि इत्यस्य अस्थीन्यभिन्ना तारकाः, चन्द्रमुद्राकपाले इत्यस्य मुद्राकपालाभिन्नः चन्द्रः इतिवद् रूपकघटितबोधो जायते । एतद्रूपकचतुष्टयं वाक्ये परस्परं सम्मिल्य मुख्यार्थस्य (रसरूपस्य ) शोभां जनयतीति कारणाद् रूपकालङ्कारः।

**प्रथमप्रकारकातिशयोक्त्यलङ्कारे गौणसाध्यवसानालक्षणायाः प्रयोजकहेतुता -** गौण्यां साध्यवसानालक्षणायां विषयिणा उपमानेन सादृश्यसम्बन्धाद् विषयस्य उपमेयस्य निगरणं क्रियते, अयमेव नियमः प्रथमातिशयोक्त्यलङ्कारेऽपि उपयुज्यते, अतिशयोक्तेर्लक्षणं तावद् - 'निगीर्याध्यवसानं तु प्रकृतस्य परेण यत् वर्तते । परेण उपमानेन निगीर्य कवलीकृत्य पृथक् अनिर्दिश्य यत् प्रकृतस्य अर्थाद् उपमेयस्य अध्यवसानम् आहार्यभेदनिश्चयः सा प्रथमप्रकारिका अतिशयोक्तिरिति फलितार्थः । उदाहरणं यथा-

कमलमनम्भसि कमले च कुवलये तानि च कनकलतिकायाम्। सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम्॥

अत्र प्रेयसीं दृष्ट्वा तत्सखीं प्रति नायकस्योक्तिः । अत्र 'कमलम्' (इति उपमानपदेन निगीर्णं नायिकामुखम् ) अनम्भसि जलशून्ये अनुदके स्थाने इत्यर्थः, कमले (इति उपमानेन निगीर्णे मुखे) कुवलये ( इति द्विवचनरूपेण उपमानेन निगीर्णे नेत्रे, रक्तादिगुणसाम्यात् कुवलयनेत्रयोरुपमानोपमेयभावः कल्प्यते), तानि कमलं कुवलयद्वयं चेति त्रीण्यपि कनकलतिकायां कान्ताशरीररूपायां सुवर्णलतायाम् ( कनकलतिका इत्युपमानेन कान्तातनुः निगीर्णम्, अत्रापि कनकलतिका कान्तातनुः इत्यनयोः सौन्दर्यातिशयादुपमानोपमेयभावः कल्प्यते) सा कनकलतिका सुकुमारा च सुभगाऽपि इत्येवंविधा उत्पातपरम्परा आश्चर्यमाला केयं कीदृशीयमिति भावः । `अत्र कमल-कुवलय-कनकलतिका-पदैः विषयिभिः उपमानैर्वा मुखनेत्रद्वय-शरीराणां कमलत्वादिना अध्यवसानान्निगरणाद् वा अतिशयोक्तिः ।

**चतुर्थातिशयोक्त्यलङ्कारे शुद्धसारोपलक्षणायाः प्रयोजकहेतुता-**अतिशयोक्त्यलङ्कारस्य 'कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः" इतिरूपस्य चतुर्थभेदस्य बीजं शुद्धा सारोपा लक्षणा वर्तते, यतोहि 'आयुर्धृतम्' इति लक्षणानियमोऽस्मिन् अलङ्कारे पाल्यते प्रयुज्यते वा । यथा कारणस्य शीघ्रकारितां वक्तुं कार्यस्य पूर्वमुक्तिः 'आयुर्धृतम्' इति उदाहरणे दृश्यते तद्वदत्रापि । 'आयुः ' कार्यं 'घृतं' च कारणम्, किन्तु घृतस्य आयुर्जनने शीघ्रकारित्वं सूचयितुम् आयूरूपस्य कार्यस्य प्रथमत उक्तिः, अर्थादत्र कारणकार्ययोः यथा विपर्ययः कृतो वर्तते तथैव चतुर्थातिशयोक्त्य-लङ्कारेऽपि द्रष्टुं शक्यते-

**हृदयमधिष्ठितमादौ मालत्याः कुसुमचापबाणेन।**
**चरमं रमणीवल्लभ ! लोचनविषयं त्वया भजता॥**

पद्येऽस्मिन् मालत्याः हृदये पूर्वं रतिः उदिता, पश्चाच्च भवता लोचनविषयं भजता ( मालत्याः) हृदयम् अधिष्ठितम्। अत्र मालत्या : हृदये रतिरूपकार्यस्य पूर्वमेवोदयो दर्शितः, पश्चाच्च रतिरूपकार्यस्य कारणं रमणीवल्लभस्य हृदयाधिष्ठानं दर्शितमिति सारः। वस्तुतोऽत्र रमणीवल्लभेन माधवेन यदा मालत्याः हृदयम् अधिष्ठितं तदा तस्या हृदये कामोदयो जात इति आशयः कारणकार्यभावेन प्रकाशनीय आसीत्, एतादृशाशयप्रकाशने रमणीवल्लभस्य माधवस्य मालत्या हृदयाधिष्ठानम् इतिरूपं कारणं, मालत्या हृदये माधवं प्रति कामाधिष्ठानं च कार्यम्। किन्तु एतयोः कारणकार्ययोरत्र विपर्ययो जातः, अर्थाद् मालत्यां कामोदयोक्तिः प्रथममेव कृता पश्चाच्च माधवस्य मालत्या : हृदयाधिष्ठानम् इत्युक्तिः कृता, अतः कार्यकारणयोः क्रमविपर्ययात् चतुर्थातिशयोक्तिरत्र।

**शुद्धसाध्यवसानालक्षणायां प्रयोजनरूपो व्यङ्ग्यो वस्तुध्वनिरूपः -** शुद्धा साध्यवसाना या लक्षणा वर्तते तस्यां प्रयोजनरूपो यो व्यङ्ग्यः, स वस्तुतो वस्तुध्वनिरूपोऽस्ति यतोहि 'आयुरेवेदं' किं वा 'आयुः पीयते' इत्युदाहरणयोः 'आयुः' पदेन आयुष्कारणं लक्ष्यते, इयं हि आयुष्कारणता 'इदम्' इति पदेन पुरोवर्तित्वरूपेण उपस्थिते घृते विद्यते । ' घृतस्य आयुर्जनने स्वातिरिक्तं सहायान्तरं विनाऽपि आयुर्जनने सामर्थ्यम्' इत्याकारकं

प्रयोजनमत्र व्यङ्ग्यम् । 'शुद्धसाध्यवसाना लक्षणाऽपि कस्यचिदलङ्कारस्य प्रयोजिका भवितुमर्हति यस्मिन् अलङ्कारे शुद्धसाध्यवसानालक्षणायाः स्थितिः घटेत, किन्तु शुद्धसाध्यवसानालक्षणाया आधारेण सम्पद्यमाने अलङ्कारे व्यक्तस्य प्रयोजनरूपस्य व्यङ्ग्यस्य एव चमत्कारोऽलङ्कारचमत्कारापेक्षया अनुभूयते। अस्यां हि लक्षणायां व्यङ्ग्यो वस्तुरूपो भवति, किन्तु केवला शुद्धसाध्यवसाना लक्षणैव वस्तुध्वनेः प्रयोजिका बीजं वा भवतीति कथयितुं न शक्यते यतोहि वस्तुध्वनये केवला शुद्धा साध्यवसाना लक्षणैव हेतुर्न भवति, प्रत्युत लक्षणायाः सर्वेषु भेदेषु प्रयोजनरूपो व्यङ्ग्यो वस्तुध्वनिरूप एव भवति, तथा च यत्र लक्षणाप्रसङ्गो नास्ति, तत्रापि अर्थादभिधामूल-ध्वनेः सङ्लक्ष्यक्रमव्यङ्ग्यभेदस्थलेऽपि वस्तुध्वनेः स्थितिर्भवतीति बोध्यम्।

**सन्दर्भग्रन्थसूची-**

1. लेखकेन विरचितम्
2. सा.द.द्वि. परि. का. सं. 03
3. काव्यप्रकाशस्य विश्वेश्वरटीकायाः 42 पृष्टे उद्धृतम्
4. का. प्र.द्वि.उ. का. सं. 09
5. का. प्र. द्वि. उल्लासः, का. सं. 10
6. काव्यप्रकाशः, द्वि.उ. एकादश्या: कारिकायाः पूर्वार्द्धभागः
7. काव्यप्रकाशः, द्वि.उ. एकादश्या: कारिकायाः अपरार्द्धभागः
8. काव्यप्रकाशः, च. उ. पद्यसंख्या 23
9. काव्यप्रकाशः, च. उ. पद्यसंख्या 24
10. काव्यप्रकाशः, द. उ. सूत्रसंख्या 138
11. काव्यप्रकाशः, द. उ. पद्यसंख्या 422
12. काव्यप्रकाशः, द. उ. सूत्रसंख्या 100
13. काव्यप्रकाशः, द. उ. पद्यसंख्या 450
14. काव्यप्रकाशः, द. उ. सूत्रसंख्या 100
15. काव्यप्रकाशः, द. उ. पद्यसंख्या 453
16. काव्यप्रकाशः, वामनी टीका, परिमलपब्लिकेशन्स, नई दिल्ली, पुनर्मुद्रित- संस्करणम् 2008
17. काव्यप्रकाशः, विश्वेश्वरटीका, ज्ञानमण्डल लिमिटेड, वाराणसी, संस्करणम् 1998
18. साहित्यदर्पणः, वटुतोषिणी टीका, अक्षयवटप्रकाशनम्, संस्करणम् 2004